# ॥ શ્રીભૈરવીહૃદયમ્ ॥

.. Shri Bhairavi Hridaya ..

sanskritdocuments.org

August 20, 2017

# .. Shri Bhairavi Hridaya ..

# ॥ શ્રીભૈરવીહૃદયમ્ ॥

## Sanskrit Document Information

Text title : bhairavI Hridayam

File name : bhairavIhRidaya.itx

Category : hRidaya, devii, dashamahAvidyA

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay

Latest update : October 1, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીભૈરવીહૃદયમ્ ॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીઉમામહેશ્વરાભ્યાં નમઃ ॥

॥ અથ શ્રીભૈરવીહૃદય પ્રારમ્ભઃ ॥

મેરૌ ગિરિવરેશાની શિવન્ધ્યાનપરાયણમ્ ।
પાર્વતી પરિપપ્રચ્છ પરાનુગ્રહવાઞ્છયા ॥ ૧॥

શ્રીપાર્વત્યુવાચ

ભગવંસ્ત્વન્મુખામ્ભોજાચ્છ્રુતા ધર્મા અનેકશઃ ।
પુનહ્સ્શ્રોતું સમિચ્છામિ ભૈરવીસ્તોત્રમુત્તમમ્ ॥ ૨॥

શ્રીશઙ્કર ઉવાચ

શૃણુ દેવિ પ્રવક્ષ્યામિ ભૈરવીહૃદયાહ્વયમ્ ।
સ્તોત્રન્તુ પરમમ્પુણ્યં સર્વકલ્યાણકારણમ્ ॥ ૩॥

યસ્ય શ્રવણમાત્રેણ મઙ્ગલમ્ભવતિ ધ્રુવમ્ ।
વિના ધ્યાનાદિના વાપિ ભૈરવી પરિતુષ્યતિ ॥ ૪॥

ૐ અસ્ય શ્રીભૈરવીહૃદયમન્ત્રસ્ય દક્ષિણામૂર્ત્તિ ઋષિઃ ।
પઙ્ક્તિ છન્દઃ । ભયવિધ્વંસિની ભૈરવી દેવતા ।
હકારો બીજમ્ । રીં શક્તિઃ । રૈઃ કીલકમ્ ।
સર્વભયવિધ્વંસનાર્થે જપે (પાઠે) વિનિયોગઃ ॥

॥ અથ કરન્યાસઃ ॥

ૐ હ્રીં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ શ્રીં તર્જનીભ્યાં નમઃ ।
ૐ ઐં મધ્યમાભ્યાં નમઃ ।
ૐ હ્રીં અનામિકાભ્યાં નમઃ ।
ૐ શ્રીં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ ઐં કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

॥ ઇતિ કરન્યાસઃ ॥

॥ અથ હૃદયાદિષડઙ્ગન્યાસઃ ॥

ૐ હ્રીં હૃદયાય નમઃ ।
ૐ શ્રીં શિરસે સ્વાહા ।
ૐ ઐં શિખાયૈ વષટ્ ।
ૐ હ્રીં કવચાય હુમ્ ।
ૐ શ્રીં નેત્રત્રયાય વૌષટ્ ।
ૐ ઐં અસ્ત્રાય ફટ્ ॥

॥ ઇતિ હૃદયાદિષડઙ્ગન્યાસઃ ॥

॥ અથ ધ્યાનમ્ ॥

દેવૈર્ધ્યે યાન્ત્રિનેત્રામસુરદલઘનારણ્યરોરાગ્નિરૂપાં
રૌદ્રીં રક્તામ્બરાઢ્યાં રતિઘટિઘટિતોરોજયુગ્મોગ્રરૂપામ્ ।
ચન્દ્રાર્દ્ધભ્રાજિભવ્યાભરણકરલસદ્ભાલબિમ્બામ્ભવાનીં
સિન્દૂરાપૂરિતાઙ્ગીં ત્રિભુવનજનનીં ભૈરવીં ભાવયામિ ॥

ભવભ્રમત્સમસ્તભૂતવેદમાર્ગદાયિની-
    ન્દુરન્તદુઃખદારિણીંવિદારિણીં સુરદ્રુહામ્ ।
ભવપ્રદામ્ભવાન્ધકારભેદનપ્રભાકરા-
    મિતપ્રભામ્ભવચ્છિદામ્ભજામિ ભૈરવીં સદા ॥ ૧॥

ઉરઃ પ્રલમ્બિતાહિમાલ્યચન્દ્રભાલભૂષણાન્-
    નવામ્બુદપ્રભાં સરોજચારુલોચનત્રયામ્ ।
સુપર્વવૃન્દવન્દિતાં સુરાપદન્તકારિકા-
    મ્ભવાનુભાવભાવિનીં ભજામિ ભૈરવીં સદા ॥ ૨॥

અખણ્ડભૂમિમણ્ડલૈકભારધીરધારિણીં
    સુભક્તિભાવિતાત્મનાં વિભૂતિભવ્યદાયિનીમ્ ।
ભવપ્રપઞ્ચકારિણીં વિહારિણીં ભવામ્બુધૌ
    ભવસ્યહૃદયભાવિનીં ભજામિ ભૈરવીં સદા ॥ ૩॥

શરચ્ચમત્કૃતાર્ચ્ચચન્દ્રચન્દ્રિકાવિરોધિક-
    પ્રભાવતીમુખાબ્જમઞ્જુમાધુરીમિલદ્ગિરામ્ ।
ભુજઙ્ગમાલયા નૃમુણ્ડમાલયા ચ મણ્ડિતાં
    સુભક્તિમુક્તિભૂતિદાં ભજામિ ભૈરવીં સદા ॥ ૪॥

સુધાંશુસૂર્યવહ્નિલોચનત્રયાન્વિતાનનાન્-
નરાન્તકાન્તકપ્રભૂતિપર્વદત્ત દક્ષિણામ્ ।
સમુણ્ડચણ્ડખણ્ડનપ્રચણ્ડચન્દ્રહાસિની-
ન્તમોમતિપ્રકાશિનીં ભજામિ ભૈરવીં સદા ॥ ૫॥

ત્રિશૂલિનીં ત્રિપુણ્ડ્રિનીં ત્રિખણ્ડિનીં ત્રિદણ્ડિનીં
ગુણત્રયાતિરક્તમત્યચિન્ત્યચિત્સ્વરુપિણીમ્ ।
સવાસવાદિતેયવૈરિવૃન્દવંશભેદિનીં
ભવપ્રભાવભાવિનીં ભજામિ ભૈરવીં સદા ॥ ૬॥

સુદીપ્તકોટિબાલભાનુમણ્ડલપ્રભાઙ્ગમા-
દિગન્તદારિતાન્ધકારભૂરિપુઞ્જપદ્ધતિમ્ ।
દ્વિજન્મનિત્યધર્મ્મનીતિવૃદ્ધિલગ્નમાનસાં
સરોજરોચિરાનનાં ભજામિ ભૈરવીં સદા ॥ ૭॥

ચલત્સુવર્ણકુણ્ડલપ્રભોલ્લસત્કપોલરુક્-
સમાકુલાનનામ્બુજસ્થશુભ્રકીર નાસિકામ્ ।
સચન્દ્રભાલભૈરવસ્ય દર્શનસ્પૃહચ્ચકોર-
નીલકઞ્જદર્શનાં ભજામિ ભૈરવીં સદા ॥ ૮॥

ઇમં હૃદાખ્યસઙ્ગતસ્તવમ્પઠન્તિ યેઽનિશ-
મ્પતન્તિ તે કદાપિનાન્ધકૂપરુપવદ્ભવે ।
ભવન્તિ ચ પ્રભૂતિભક્તિમુક્તિમન્ત ઉજ્જ્વલા-
સ્તતઃ પ્રસીદતિ પ્રમોદમાનસા ચ ભૈરવી ॥ ૯॥

યશોજગત્યજસ્રમુજ્જ્વલઞ્જયત્યલં સમે
ન તસ્ય જાયતે પરાજયોઞ્જસા જગત્ત્રયે ।
સદા સ્તુતિં શુભામિમામ્પઠત્યનન્યમાનસો
ભવન્તિ તસ્ય સમ્પદોઽપિસન્તતં સુખપ્રદાઃ ॥ ૧૦॥

જપપૂજાદિકાસ્સર્વાઃ સ્તોત્રપાઠાદિકાશ્ચ યાઃ ।
ભૈરવીહૃદયસ્યાસ્ય કલાન્નાર્હન્તિ ષોડશીમ્ ॥ ૧૧॥

કિમત્ર બહુનોક્તેન શૃણુ દેવિ મહેશ્વરિ ।
નાતઃ પરતરઙ્કિઞ્ચિત્પુણ્યમસ્તિ જગત્ત્રયે ॥ ૧૨॥

॥ ઇતિ શ્રીભૈરવીકુલસર્વસ્વે શ્રીભૈરવીહૃદયસ્તોત્રં સમાપ્તમ્ ॥

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

.. Shri Bhairavi Hridaya ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*